


सप्तमः पाठः

७

# विद्यामहिमा

प्रस्तुत पाठ विद्या के महत्त्व को प्रतिपादित करने वाली सूक्तियों को समाहित करते हुए विद्या की महिमा को बताता है। पाठ में ये सूक्तियाँ *हितोपदेश* (आचार्य नारायण पण्डित विरचित), *पंचतंत्र* (आचार्य विष्णुशर्मा विरचित) व अन्य प्रचलित सूक्ति ग्रन्थों से संकलित की गई हैं। विनम्रता एवं सदाचार को स्थापित करती ये सूक्तियाँ विद्यार्थी के सर्वांगीण विकास को लक्षित करती हैं।

This lesson presents the glory of knowledge through a collection of aphorisms emphasizing its importance. These sayings have been selected from the *Hitopadesha* (of Acharya Narayana Pandita), the *Panchatantra* (of Acharya Vishnu Sharma), and other popular compilations of wise maxims. Instilling humility and ethical conduct. These aphorisms are intended to foster the all-round development of students.

(१)

न चौरहार्यं न च राजहार्यं,
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं,
विद्याधनं सर्वधनप्रधानम्॥



© NCERT not to be republished

**पदच्छेदः**

न चौरहार्यम् न च राजहार्यम् न भ्रातृभाज्यम् न च भारकारि व्यये कृते वर्धते एव नित्यम् विद्याधनम् सर्वधनप्रधानम्।

**अन्वयः**

(विद्याधनं) चौरहार्यं न, राजहार्यं च न, भ्रातृभाज्यं च न, भारकारि च न (अस्ति)। (एतत्) व्यये कृते नित्यं वर्धते एव, (तस्मात्) विद्याधनं सर्वधनप्रधानम् (अस्ति)।

**भावार्थः**

अस्य श्लोकस्य भावः अस्ति यत् संसारे विद्याधनं श्रेष्ठं धनं वर्तते। एतत् धनं न तु चौराः चोरयितुं शक्नुवन्ति, न च राजा बलात् ग्रहीतुं शक्नोति। एतस्य धनस्य भ्रातृषु विभाजनम् अपि न सम्भवति, तथा च एतत् धनं मनुष्यस्य उपरि किमपि भारं न जनयति। अस्य धनस्य मुख्यः विशेषः अयम् अस्ति यत् प्रतिदिनं व्यये कृते अपि (अन्येभ्यः दानेन) एतत् वर्धते एवं न क्षयं याति। अतः विद्याधनं सर्वविधधनेषु प्रधानम् अस्ति।

(२)

विद्या ददाति विनयं विनयाद्याति पात्रताम्।

पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम्।।

**पदच्छेदः**

विद्या ददाति विनयम् विनयात् याति पात्रताम् पात्रत्वात् धनम् आप्नोति धनात् धर्मम् ततः सुखम्।

**अन्वयः**

विद्या विनयं ददाति, (जनः) विनयात् पात्रतां याति, पात्रत्वात् धनम् आप्नोति, धनात् धर्मम् (आप्नोति), ततः (च) सुखम् (आप्नोति)।

© NCERT not to be republished

**भावार्थः**

अस्य श्लोकस्य भावः अस्ति यत् ज्ञानं (विद्या) मनुष्यस्य अन्तःकरणे नम्रताम् (अहंकारहीनताम्) जनयति। यदा मनुष्ये नम्रता आगच्छति, तदा सः समाजे योग्यतां (पात्रताम्) प्राप्नोति। योग्यताबलेन मनुष्यः धनं प्राप्नोति, तेन धनेन सः मनुष्यः परोपकारादिं कर्त्तव्यानि करोति। अन्ते च तेषां प्रभावेण सः जीवने शाश्वतं सुखं प्राप्नोति। अतः विद्या एव सुखस्य मूलम् अस्ति।

**(३)**

**अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।**
**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥**

**पदच्छेदः**

अपूर्वः कः अपि कोशः अयम् विद्यते तव भारति व्ययतः वृद्धिम् आयाति क्षयम् आयाति सञ्चयात्।

**अन्वयः**

हे भारति! तव अयम् कः अपि अपूर्वः कोशः विद्यते, (यः) व्ययतः वृद्धिम् आयाति, सञ्चयात् (च) क्षयम् आयाति।

**भावार्थः**

हे सरस्वति! तव अयं विद्यारूपी कोशः अद्भुत अस्ति। संसारे साधारणं धनं व्यये कृते सति न्यूनं भवति, परन्तु विद्याधनं तु यथा यथा अन्येभ्यः दीयते (व्ययः क्रियते), तथा तथा एतस्य वर्धनं (वृद्धिः) भवति। यदि एतत् धनं केवलं रक्षित्वा स्थाप्यते (न दीयते), तर्हि एतत् शनैः शनैः नष्टं (क्षयं) भवति।

(४)

**विद्वत्त्वं च नृपत्वं च नैव तुल्ये कदाचन।**
**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥**

**पदच्छेद:**

विद्वत्त्वम् च नृपत्वम् च न एव तुल्ये कदाचन स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।

**अन्वय:**

विद्वत्त्वं च नृपत्वं च कदाचन तुल्ये न एव (भवत:), (यत:) राजा स्वदेशे एव पूज्यते, (परन्तु) विद्वान् (तु) सर्वत्र पूज्यते।

**भावार्थ:**

अस्मिन् श्लोके विदुष: (ज्ञानिजनस्य) राज्ञ: (नृपस्य) च तुलना अस्ति। भाव: अयमस्ति यत् बुद्धिमत्ता (विद्वत्त्वम्) राजपदम् (नृपत्वम्) च एतयो: द्वयो: कदापि समानता न भवितुं शक्नोति। यत: कश्चिद् राजा केवलं स्वकीये राज्ये (देशे) एव सम्मानं लभते, तस्य अधिकार: सीमित: भवति। परन्तु य: विद्वान् भवति, स: स्वगुणानां ज्ञानस्य च प्रभावेण सम्पूर्णे संसारे (सर्वत्र) गौरवं सम्मानं च प्राप्नोति। अत: विद्वत्ता राजपदात् श्रेष्ठा वर्तते।

(५)

**किं कुलेन विशालेन विद्याहीनस्य देहिन:।**
**अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते॥**

**पदच्छेद:**

किम् कुलेन विशालेन विद्याहीनस्य देहिन: अकुलीन: अपि विद्यावान् देवै: अपि स: पूज्यते।

© NCERT not to be republished

**अन्वयः**

विद्याहीनस्य देहिनः विशालेन कुलेन किम्? अकुलीनः अपि विद्यावान् (यः अस्ति), सः देवैः अपि पूज्यते।

**भावार्थः**

अस्य श्लोकस्य भावः अस्ति यत् यदि कश्चित् मनुष्यः ज्ञानहीनः अस्ति, तर्हि तस्य उच्चकुले (प्रतिष्ठितवंशे) जन्म निरर्थकम् अस्ति। तस्य वंशस्य कोऽपि लाभः न भवति। परं यदि कश्चित् जनः अप्रतिष्ठितकुले अपि उत्पन्नः भूत्वा विद्वान् (ज्ञानवान्) भवति, तर्हि देवाः अपि तस्य आदरं कुर्वन्ति। अतः उच्चकुले जन्मनः अपेक्षया विद्या एव महनीया पूजनीया च अस्ति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| चौरहार्यम् | चौरेण हरणीयम् | चोरों द्वारा चुराया जा सकने वाला | Stealable | |
| राजहार्यम् | नृपेण हरणीयम् | राजा द्वारा छीना जा सकने वाला | Confiscable by a king | |
| भ्रातृभाज्यम् | बन्धुषु विभाज्यम् | भाईयों में बाँटने योग्य | Divisible among brothers | |
| भारकारि | भारभूतम् / भारकारकम् | बोझ बढ़ाने वाला | Burdensome | |
| व्ययः | उद्व्ययः | खर्च | Expenditure | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| विद्याधनम् | ज्ञानसम्पत्तिः | ज्ञानरूपी धन | Wealth of knowledge | |
| विनयः | विनम्रता | नम्रता | Humility | |
| पात्रता | योग्यता | क्षमता | Worthiness | |
| धर्मः | सदाचारः | धर्म, कर्तव्य | Righteousness | |
| सुखम् | आनन्दः | प्रसन्नता | Happiness | |
| कोशः | भाण्डागारः | खजाना | Treasure | |
| अपूर्वः | अद्वितीयः | अनोखा | Unique | |
| वृद्धिम् | वर्धनम् | वृद्धि | Growth | |
| क्षयम् | ह्रासः | नष्ट होना | Decline | |
| विद्वत्त्वम् | पाण्डित्यम् | विद्वत्ता | Wisdom | |
| नृपत्वम् | राजत्वम् | राजत्व | Kingship | |
| स्वदेशे | स्वराष्ट्रे | अपने देश में | In one's own country | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| पूज्यते | वन्द्यते | पूजा की जाती है | worshiped | |
| अकुलीनः | अप्रशस्तकुलसम्भवः | अप्रतिष्ठित कुल में जन्मा | Of humble birth | |
| भारति! | हे शारदे | हे सरस्वती | O Saraswati! (Goddess of Knowledge) | |
| देहिनः | शरीरधारिणः | मनुष्य का | Of Human | |

## अत्र इदम् अवधेयम्

### १. पाठस्य मुख्यसन्देशः

विद्या सर्वश्रेष्ठं धनं वर्तते। संसारे अन्यानि सर्वाणि धनानि (सुवर्णं, रजतं, भूमिः च) केनापि अपहर्तुं शक्यन्ते, अथवा व्यये कृते तानि न्यूनानि भवन्ति। परन्तु विद्यारूपि धनं वितरणात् (अन्येभ्यः दानात्) सदैव वर्धते। कुलस्य अपेक्षया गुणस्य महत्त्वम् अधिकं भवति। मनुष्यस्य वास्तविकः परिचयः तस्य उच्चकुलेन (प्रतिष्ठितवंशेन) न भवति, अपि तु तस्य ज्ञानगुणेन तथा च नम्रतया (विनयेन) भवति।

एकस्य राज्ञः शक्तिः आदरः च केवलं तस्य राज्यसीमायां (स्वदेशे) एव सीमितः भवति, परन्तु एकः शिक्षितः विद्वान् च जनः सम्पूर्णे संसारे (सर्वत्र) गौरवं सम्मानं च लभते। इत्थं विद्यायाः महत्त्वं प्रतिपादयन्त्यः एताः पङ्क्तयः एनं सन्देशं ददति यत् विद्यया अर्थात् ज्ञानेन एव धनं, यशः, सम्मानं च युगपत् (एकत्रैव) प्राप्तुं शक्नुमः।

© NCERT not to be republished

## २. सन्धि-विच्छेदः

क. कोऽपि – कः + अपि (उत्व-विसर्गसन्धिः)

ख. कोशोऽयम् – कोशः + अयम् (उत्व-विसर्गसन्धिः)

ग. वृद्धिमायाति – वृद्धिम् + आयाति (संयोगः/ अनुस्वारसन्धिः)

घ. क्षयमायाति – क्षयम् + आयाति (संयोगः/ अनुस्वारसन्धिः)

ङ. पात्रत्वाद्धनम् – पात्रत्वात् + धनम् (जश्त्व-व्यञ्जनसन्धिः)

च. धनाद्धर्मम् – धनात् + धर्मम् (जश्त्व-व्यञ्जनसन्धिः)

छ. अकुलीनोऽपि – अकुलीनः + अपि (उत्व-विसर्गसन्धिः)

## ३. महत्त्वपूर्णाः अव्ययशब्दाः

न ( नहीं ), च (और), एव ( ही), नित्यम् (हमेशा), अपि ( भी ), कदाचन ( कभी भी) , सर्वत्र (सभी जगह), किम् (क्या)।

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरत—**

क. विद्या किं ददाति ?

ख. कस्मात् पात्रतां याति ?

ग. राजा कुत्र पूज्यते ?

घ. विद्वान् कुत्र पूज्यते ?

ङ. कस्य कोशः अपूर्वः अस्ति ?

## २. रिक्तस्थानानि पूरयत—

**यथा—** **विद्याधनम्** सर्वधनप्रधानम्॥

क. न भ्रातृभाज्यं न च ........................।

ख. विनयाद्याति ........................।

ग. अपूर्वः कोऽपि ........................ विद्यते तव भारति।

घ. व्ययतो वृद्धिमायाति ........................ सञ्चयात्।

ङ. विद्वत्त्वं च ........................ च नैव तुल्ये कदाचन।

## २. अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत—

**यथा—** आयाति – आयन्ति।

क. विद्यते –

ख. याति –

ग. वर्धते –

घ. पूज्यते –

ङ. उच्यते –



## क्रियाकलापः

**भागः अ**

१. शिक्षकाः पाठे आगतान् श्लोकान् लयेन गायन्तु, तेभ्यः प्रश्नान् च पृच्छन्तु।

२. छात्राः प्रदत्तान् 'विद्या-महिमा' इति पाठस्य श्लोकान् सस्वरं (लय-ताल-सहितम्) शुद्धम् उच्चारणं करिष्यन्ति।

३. "विद्याधनं सर्वधनप्रधानम्" (विद्या कस्मात् कारणात् सर्वश्रेष्ठं धनं वर्तते?) इति विषये स्वविचारान् स्वभाषायाम् अथवा सरलसंस्कृते २-३ वाक्येषु वदन्तु।

४. शिक्षकः श्लोकेषु आगतानां शब्दार्थानाम् उपरि कक्षायां छात्रैः सह प्रतियोगितां कारयेत्।

५. शिक्षकः श्लोकस्य अर्धपङ्क्तिं वदिष्यति, छात्राः च अग्रिमां पङ्क्तिं मौखिकरूपेण पूरयिष्यन्ति (यथाः शिक्षकः– "व्यये कृते वर्धत एव नित्यं..." ⟶ छात्राः– "... विद्याधनं सर्वधनप्रधानम्")।

© NCERT not to be republished





**भागः ब**

**१. मञ्जूषायाः (अधोदत्तात् कोष्ठकात्) उचितं पदं चित्वा श्लोकं पूरयन्तु।**

क. विद्याधनं ....................अस्ति। (सर्वधनप्रधानम्/भारकारि)

ख. विद्या सञ्चयात्............ याति। (क्षयम्/वृद्धिम्)

ग. विद्वान् ..................... पूज्यते। (स्वदेशे/सर्वत्र)

**२. विशेष्य-विशेषणमेलनम् (उचितं मेलनं कुरुत)#**

**निर्देशः** 'क' खण्डे दत्तानां विशेषणशब्दानां 'ख' खण्डे दत्तैः उचितैः विशेष्यशब्दैः सह मेलनं कुरुत—

| खण्डः 'क' विशेषणम् | खण्डः 'ख' विशेष्यम् |
|---|---|
| क. अपूर्वः | (१) धनम् |
| ख. सर्वधनप्रधानम् | (२) कोशः |
| ग. गुप्तम् | (३) विद्या |

**३. सत्यम्/आम् (असत्यम्/न)**

**निर्देशः** दत्तानि कथनानि पठित्वा सम्मुखे कोष्ठके शुद्धकथनाय 'आम्' अशुद्धकथनाय च 'न' लिखन्तु

क. विद्यारूपि धनं भ्रातृभाज्यम् अस्ति। (..................)

ख. विद्याधनं व्यये कृते न्यूनं भवति। (..................)

ग. राजा केवलं स्वदेशे एव पूज्यते। (..................)

© NCERT not to be republished